उपवासासमर्थश्चेत् फलमूलजलं पिबेत् ।
नष्टे शरीरे स भवेदन्यथा चात्मघातकः ॥
सकृद्भुङ्क्ते हविष्यान्नं विष्णोर्नैवेद्यमेव च ।
न भवेत् प्रत्यवायी स चोपवासफलं लभेत् ॥
एकादश्यामनाहारो यदी विप्रश्च भारत ! ।
ते च तिष्ठन्ति वैकुण्ठे यावद्वै ब्रह्मणो वयः ॥
गृहिणां शैवशाक्तानामिदमुक्तञ्च नारद ! ।
विशेषतो वैष्णवानां यतीनां ब्रह्मचारिणाम् ॥
नित्यं नैवेद्यभोजी च श्रीकृष्णस्य च वैष्णवः ।
नित्यं व्रतोपवासानां जीवन्मुक्तो लभेत् फलम् ॥
वाञ्छन्ति तस्य संस्पर्शं तीर्थानि सर्व्वदेवताः ।
आलापं दर्शनञ्चैव सर्व्वपापप्रणाशनम् ॥
हविष्यमन्नं पृथुकं शुद्धं देशविशेषके ।
नात्यन्तशस्तं विप्राणां भक्षणे च निवेदने ॥
अभक्ष्यञ्च यतीनाञ्च विधवाब्रह्मचारिणाम् ।
ताम्बूलञ्च यथा ब्रह्मन् ! तथैते वस्तुनी ध्रुवम् ॥
ताम्बूलं विधवास्त्रीणां यतीनां ब्रह्मचारिणाम् ।
तपस्विनाञ्च विप्रेन्द्र ! गोमांससदृशं ध्रुवम् ॥
सर्व्वेषां ब्राह्मणानाञ्च अभक्ष्यं शृणु नारद ! ।
यदुक्तं सामवेदे च हरिणा चाह्निकक्रमे ॥
ताम्रपात्रे पयःपानं उच्छिष्टे घृतभोजनम् ।
दुग्धं लवणसार्द्धञ्च सद्यो गोमांसभक्षणम् ॥
नारिकेलोदकं कांस्ये ताम्रपात्रे स्थितं मधु ।
ऐक्षवं ताम्रपात्रस्थं सुरातुल्यं न संशयः ॥
उत्थाय वामहस्तेन यत्तोयं पिबति द्विजः ॥
सुरापीती स विज्ञेयः सर्व्वधर्म्मबहिष्कृतः ॥
अनिवेद्यं हरेरन्नं भक्ष्यशेषञ्च निष्फलः ।
पीतशेषं जलञ्चैव गोमांससदृशं मुने ! ॥
वार्त्ताकमपलञ्चैव गोमांसं कार्त्तिके स्मृतम् ।
माघे च मूलकञ्चैव कलम्बी शयने तथा ॥
श्वेतवर्णञ्च तालञ्च मसूरं मत्स्य एव च ।
सर्व्वेषां ब्राह्मणानाञ्च त्याज्यञ्च सर्व्वदेशतः ॥
मत्स्यांश्च कामतो भुक्त्वा चोपवासं त्र्यहं वसेत् ।
प्रायश्चित्तं ततः कृत्वा शुद्धिमाप्नोति ब्राह्मणः ॥
प्रतिपत्सु च कुष्माण्डमभक्ष्यमर्थनाशनम् ।
द्वितीयायाञ्च वृहतीभोजको न स्मरेद्धरिम् ॥
अभक्ष्यञ्च पटोलञ्च शत्रुवृद्धिकरं परम् ।
तृतीयायाञ्चतुर्थ्याञ्च मूलकं धननाशकम् ॥
कलङ्ककारकञ्चैव पञ्चम्यां विल्वभक्षणम् ।
तिर्य्यग्योनिं प्रापयेत्तु षष्ठ्याञ्च निम्बभक्षणम् ॥
रोगवृद्धिकरञ्चैव सप्तम्यां तालभक्षणम् ।
नारिकेलफलं भक्ष्यमष्टम्यां बुद्धिनाशनम् ॥
तुम्बी नवम्यां गोमांसं दशम्याञ्च कलम्बिका ।
एकादश्यां तथा शिम्बी द्वादश्यां पूतिका तथा ॥
त्रयोदश्यान्तु वार्त्ताकीभक्षणं पुत्त्रनाशनम् ।
चतुर्द्दश्यां माषभक्ष्यं महापापकरं परम् ॥
पञ्चदश्यां तथा मांसमभक्ष्यं गृहिणां मुने ! ।
गृहिणां शोधितं मांसं भक्ष्यमन्यदिने दिने ॥
मांसञ्च रक्तशाकञ्च कांस्यपात्रे च भोजनम् ।
निषिद्धं शयने चैव कूर्म्ममांसञ्च शोधितम् ॥
रात्रौ च दधिभक्तञ्च शयनं सन्ध्ययोर्द्दिने ।
रजस्वलावीरान्नञ्च पुंश्चलीनामभक्षणम् ॥

शूद्राणां याजकानाञ्च शूद्रश्राद्धान्नमेव च ।
अभक्ष्याणाञ्च विप्रर्षे ! यदन्नं वृषलीपतेः ॥
ब्रह्मन् ! वार्द्धुषिकान्नञ्च गणकानामभक्ष्यकम् ॥
अग्रदानीद्विजानाञ्च चिकित्साकारकस्य च ।
हस्ताश्चिन्वाहरौ तैलमग्राह्यञ्चाप्यभक्ष्यकम् ।
मूले मृगे भाद्रपदे मांसं गोमांसतुल्यकम् ॥”
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे २७ अध्यायः पाद्मे स्वर्गखण्डे ३१ अध्यायश्च ॥

नारद उवाच ।
“वर्णानाञ्च चतुर्णाञ्च भक्ष्याभक्ष्यञ्च साम्प्रतम् ।
विपाकं कर्म्मणाञ्चैव सर्व्वेषां प्राणिनामपि ॥
कथयस्व महाभाग ! कारणानाञ्च कारण ! ।
त्वत्तोऽन्यं कञ्च पृच्छामि नितान्तं सन्त-
मीश्वर ! ॥

श्रीभगवानुवाच ।
भक्ष्याभक्ष्यं चतुर्णाञ्च वर्णानाञ्च यथोचितम् ।
वेदोक्तं श्रूयतां तात ! सावधानं निशामय ॥
अयःपात्रे पयःपानं गव्यं सिद्धान्नमेव च ।
भृष्टादिकं मधु गुड़ं नारिकेलोदकं तथा ॥
फलं मूलञ्च यत्किञ्चिदभक्ष्यं मनुरब्रवीत् ।
दग्धान्नं तप्तसौवीरमभक्ष्यं ब्रह्मणा मतम् ॥
नारिकेलोदकं कांस्ये ताम्रपात्रे स्थितं मधु ।
गव्यञ्च ताम्रपात्रस्थं सर्व्वं मद्यं घृतं विना ॥
ताम्रपात्रे पयःपानमुच्छिष्टे घृतभोजनम् ।
दुग्धं सलवणञ्चैव सद्यो गोमांसभक्षणम् ॥
अभक्ष्यं मधुमिश्रञ्च घृतं तैलं गुड़ं तथा ।
आर्द्रकं गुड़संयुक्तमभक्ष्यं श्रुतिसम्मतम् ॥
पीतशेषं जलञ्चैव माघे च मूलकं तथा ।
द्विर्भोजनञ्च दिवसे सन्ध्ययोर्भोजनं तथा ॥
भक्ष्यञ्च रात्रिशेषे च ध्रुवं प्राज्ञः परित्यजेत् ।
पानीयं पायसं चूर्णं घृतं लवणमेव च ॥
स्वस्तिकं लवणञ्चैव चीरं तक्रं तथा मधु ।
हस्ताद्धस्तगृहीतञ्च सद्यो गोमांसभक्षणम् ॥
कर्पूरं रौप्यपात्रस्थमभक्ष्यं श्रुतिसम्मतम् ।
परिवेशनकारी चेद्भोक्तारं स्पृशते यदि ॥
अभक्ष्यञ्च तदन्नञ्च सर्व्वेषामेव सम्मतम् ।
नकुलानां गण्डकानां महिषाणाञ्च पक्षिणाम् ॥
सर्पाणां शूकराणाञ्च गर्द्दभानां विशेषतः ।
मार्जाराणां शृगालानां कुक्कुराणां व्रजेश्वर ! ॥
व्याघ्राणामपि सिंहानां त्याज्यं मांसं नृणां सदा ।
जलौकसाञ्च नक्राणां गोधिकानां तथैव च ॥
मण्डूकानां कर्कटीनां चञ्चुकानाञ्च निश्चितम् ।
गवाञ्च चमरीणाञ्च कलौ मांसमभक्ष्यकम् ॥
हस्तिनां घोटकानाञ्च नृणामेव च रक्षसाम् ।
दंशश्च मशकश्चैव मक्षिका च पिपीलिका ॥
अन्येषाञ्च निषिद्धानां लोके वेदे व्रजेश्वर ! ।
वानराणां भल्लूकानां शरभाणां तथैव च ॥
निषिद्धं मृगनाभीनां गर्द्दभानाञ्च मांसकम् ।
अभक्ष्यं महिषाणाञ्च दुग्धं दधि घृतं तथा ॥
स्वस्तिकञ्च तथा चक्रं विप्राणां नवनीतकम् ।
मांसशुचेःश्वपचकं तस्य दुग्धादिकं तथा ॥
वर्णानाञ्च चतुर्णाञ्चाप्यभक्ष्यञ्च श्रुतौ श्रुतम् ।

अभक्ष्यमार्द्रकञ्चैव सर्व्वेषाञ्च रवेर्द्दिने ॥
पर्य्युषितं जलञ्चान्नं विप्राणां दुग्धमेव च ।
वर्णानाञ्च चतुर्णाञ्चावीरान्नस्य च भक्षणम् ॥
तदन्नञ्च सुरातुल्यं गोमांसाधिकमेव च ।
अवीरान्नञ्च यो भुङ्क्ते ब्राह्मणो ज्ञानदुर्ब्बलः ।
पितृदेवार्च्चनं तस्य निष्फलं मनुरब्रवीत् ॥
ब्राह्मणानां वैष्णवानामभक्ष्यं मत्स्यमेव च ।
इतरेषामभक्ष्यञ्च पञ्चपर्व्वसु निश्चितम् ॥
पितृदेवावशेषे च भक्ष्यं मांसं न दूषितम् ।
पञ्चपर्व्वसु त्याज्यञ्च सर्व्वेषां मनुरब्रवीत् ॥
असंस्कृतञ्च लवणं तैलञ्चाभक्ष्यमेव च ।
भक्ष्यं पवित्रं सर्व्वेषां यज्ञेन वह्निसंस्कृतम् ॥
एकहस्ते घृतं तोयमभक्ष्यं सर्व्वसम्मतम् ।
आविलं कृमियुक्तञ्चापरिशुद्धन्त्वनिर्म्मलम् ॥
अभक्ष्यं ब्राह्मणानाञ्च वैष्णवानां विशेषतः ।
अनिवेद्यं हरेरेव यतीनां ब्रह्मचारिणाम् ॥
पिपीलिकामिश्रितञ्च मधु गव्यं गुड़ं तथा ।
यत्किञ्चिद्वस्तु वा तात ! न भक्ष्यञ्च श्रुतौ श्रुतम् ॥
पक्षिभक्ष्यं कीटभक्ष्यं शुद्धं पक्वफलन्तथा ।
काकभक्ष्यमभक्ष्यञ्च सर्व्वेषां द्रव्यमेव च ॥
घृतपक्वं तैलपक्वं मिष्टान्नं शूद्रसंस्कृतम् ।
अभक्ष्यं ब्राह्मणानाञ्च शूद्रभ्रष्टं चिपीटकम् ॥
सर्व्वेषामशुचीनाञ्च जलमन्नं परित्यजेत् ।
अशौचान्तात् परदिने शुद्धमेव न संशयः ॥
विपाकः कर्म्मणामेव दुष्करः श्रुतिसम्मतम् ।
भक्ष्याभक्ष्यञ्च कथितं यथाज्ञानं व्रजेश्वर ! ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८५ अध्यायः ॥
“भक्ष्याभक्ष्यञ्च ते शिष्य ! वेदितव्यं तदन्तरे ।
करीरस्य वधः शस्तः फलान्यौदुम्बरस्य च ॥
सद्यो भक्षी भवेत्तेन अभक्ष्या पूतिवासिका ।
न भक्षणीयं वाराहं मांसं मत्स्यश्च सर्व्वशः ॥
अभक्ष्या ब्राह्मणैर्ह्येते दीक्षितैर्हि न संशयः ॥”
इति वाराहे ब्राह्मणदीक्षासूत्रनामाध्यायः ॥

भक्ष्यालाबुः, स्त्री, (भक्ष्या भक्षार्हा अलाबुः ।) राजालाबुः । इति राजनिर्घण्टः ॥

भगं, क्ली, पुं, (भज्यते अनेनास्मिन् वेति एतदाश्रित्यैव कन्दर्पं सेवते इति भावः । भजसेवायाम् + “पुंसि संज्ञायां घः प्रायेण ।” ३ । ३ । ११८ । इति घः । “खनो घ च ।” ३।३।१२५। चितृकरणमन्यतोऽप्ययमिति विज्ञापनार्थम् इति हरिदत्तभट्टोजीदीक्षितः ।) स्त्रीचिह्नम् । तत्पर्य्यायः । योनिः २ । इत्यमरः ।२।६।७६॥ वराङ्गम् ३ उपस्थः ४ स्मरमन्दिरम् ५ । इति राजनिर्घण्टः ॥ (भजन्त्यनेनेति भगो मेहनम् । भजन्त्यस्मिन्निति भगं योनिः । अत्र भगशब्देन द्वयमपि कथ्यते । इति भावप्रकाशस्य मध्यखण्डे चतुर्थे भागे ॥
“ब्रह्मा वृहस्पतिर्विष्णुः सोमः सूर्य्यस्तथाश्विनौ ।
भगोऽथ मित्रावरुणौ वीरं ददतु मे सुतम् ॥”
इति वाभटे शारीरस्थाने प्रथमेऽध्याये ।) रतिगृहम् ६ जन्मवर्त्म ७ अधरम् ८ अवाच्यदेशः ९ प्रकृतिः १० अपथम् ११ स्मरकूपः १२